ब्र.कं. सप्तभ्यश्च समुद्रेभ्यः सागरेभ्यश्च सर्वदा। उत्तरेभ्यः कुरुभ्यश्च नमो हैरावताय च। भद्राश्वकेतुमालाभ्यां नमः सर्वत्र सर्वदा। इलावृताय
१२ च नमो हरिवर्षाय चैव हि। नमः किंपुरुषेभ्यश्च भारताय नमो नमः। नमो भारतभेदेभ्यो नवभ्यश्चापि सर्वदा। पातालेभ्यश्च सप्तभ्यो नर
केभ्यो नमो नमः। कालाग्निसहशेषाभ्यां हरये कोडरूपिणे। सप्तभ्यस्तपलोकेभ्यो महान्तेभ्य एव च। मनसे बुद्धये चैव नमः
प्रकृतये तथा। पुरुषायाभिमानाय नमोऽस्त्वव्यक्तमूर्तये। हिमवत्प्रमुखेभ्यश्च पर्वतेभ्यो नमस्तथा। पौराणीभ्यश्च गंगाभ्यः सप्तभ्य
श्च नमो नमः। नमोऽस्त्वाद्यमुनिभ्यश्च सप्तभ्यश्चापि सर्वदा। नमोऽस्तु पुष्करादिभ्यस्तीर्थेभ्यश्च पुनः पुनः। निम्नगाभ्यो नमो नित्यं वितस्ताया
भ्य एव च। चतुर्दशभ्यो दीर्घेभ्यो धारिणीभ्यो नमो नमः। नमो धात्रे विधात्रे च छंदोभ्यश्च नमो नमः। सुरभ्यैरावणाभ्यां च नमो भूयो नमो नमः।
नमस्तेभ्यो हैः अश्वसेभ्युवाय च नमो नमः। नमोऽस्तु धन्वन्तरये शास्त्राभ्यां नमः सदा। विनायककुमाराभ्यां विघ्नेभ्यश्च नमो नमः। शाखाय च
विशाखाय नैगमेयाय चैव नमः। नमः स्कंदग्रहेभ्यश्च स्कंदमातृभ्य एव च। ज्वराय रोगपतये भस्मप्रहरणाय च। ऋषिभ्यो वालखिल्येभ्यः
केशवाय नमः सदा। अगस्त्यायेनारदाय व्यासादिभ्यो नमो नमः। अप्सरोभ्यः सोमपेभ्यो देवेभ्यश्च नमो नमः। असोमपेभ्यश्च नमो नमोऽस्तु
षितेभ्यो नमः सदा। आदित्येभ्यो नमो नित्यं द्वादशभ्यश्च सर्वदा। एकादशभ्यो रुद्रेभ्यस्तपस्विभ्यो नमो नमः। नमो नासत्यदस्राभ्यां मरुद्भ्यो
नित्यमेव हि। साध्येभ्यो द्वादशभ्यश्च पौरोरोभ्यो नमः सदा। एकोनपंचाशते च मरुद्भ्यश्च नमो नमः। शिल्पाचार्याय देवाय नमस्ते विश्व राम. १२

कर्मणे। अष्टभ्यो लोकपालेभ्यः सानुगेभ्यश्च सर्वदा। आयुधेभ्यो वाहनेभ्यो वर्मभ्यश्च नमः सदा। आसनेभ्यो दुंदुभिभ्यो देवेभ्यश्च नमः
सदा। दैत्यराक्षसगंधर्वपिशाचेभ्यश्च नित्यशः। पितृभ्यः सप्तभेदेभ्यः प्रेतेभ्यश्च नमो नमः। सुतल्पेभ्यश्च देवेभ्यो भावगेभ्य एव च। नमः
स्तेव कृत्स्नपाय विश्वे परमात्मने। अथ किंबहुनोक्तेन मंत्रेणानेन चार्चयेत्। आसुरोद्भूतान्निष्पन्दे चानुदिश्य पूर्ववत्। अथवा
किमत्र विस्तरेण ब्राह्मणानेव देवतोद्देशेन तज्जपादि तर्पयेः। पूर्ववत् मंत्रोक्तक्रमेण। अग्रे वै पुष्पैश्च धूपैश्च वस्त्रैर्मीलैः सहस्रकं। सह
स्रकं स्वरोमांचं तत्र रोमाः सत्रर्वे यदि त्यर्थः। अधनश्चाप्यनुविभवैर्द्विरागान्श्च सर्वदा। इति हा सपुराणानां प्रवरं च द्विजोत्तमानां। काल
ज्ञानवेदवेदज्ञान् सपत्नाकं वं विविधं च वाचा। अनेनैव तु मंत्रेण तस्या होते नष्टय्यकृष्टयज्ञा। यदि ष्टायामापेहोमः कर्तव्यः सर्वत्र तत्पौद्दवि
त्रे तपी दत्तास्थाने अप्रधानिके सति। यदि प्रायश्चित्तापवेदनित्वे दोक्तविधिनेः। मदनरत्ने तु वेदव्रतादि इति पठित्वा वेदोक्तविधिने हि
श्यारस्यातं। च तु यी।। आज्यभागो। प्राधानिकस्थाने प्रधानहोमारंभे। होमारंभे। होमारंभे ततः कुर्यात्समंगलालंभनं नरः। मदनरत्ने।
शालाशोभातत ततः कार्या मंगलालंभनं ततः इति पाठः। भोजयित्वा द्विजानन्वीत्स्रुतः तत्संवेधिवान्धवान्। विशेषेण शुभो क्तकंकायेष्वपि
महोत्सवः। नैव संवत्सरारंभः सर्वसिद्धिप्रवर्तकः।। ।।इति संवत्सरारंभविधिः।। अथ चैत्रे विधुधर्मोत्तरे कुमारे व्यपतिदृष्टं पुष्क
रउवाच। संवत्सरावसाने तु पंचदश्यामुपोषितः। प्रातः प्रतिपदि स्नातः कुर्याद्भूत मनन्यधीः। ब्रजेपद्मास्करं देवं वर्णकैः कमलेकृतं

व्र.रा.
१८

वर्णकैः रक्तश्वेतनीलपीतादिभिः। युक्तेन गंधमाल्येन चंदनेन सितेन च। तथा कुंदुरुधूपेन घृतधूपेन भार्गव। कुंदुरुः सल्लकीनिर्या
सः। ग्रन्थस्यैः सैंकतैर्दध्ना परमान्नेन मधुरिणा सेकृते शर्करादिकैरैः। ओदनेन च खंडकेन सता लवणसर्पिषा। सताउक्रमेण। क्षीरेण च
फाले। युक्तैर्वक्तिब्राह्मणतर्पणैः। भ्रजपित्वा जमद्राजमदिनभागे चतुर्थके। आहारं त्रयमं कुर्यात्स्वधनं मनुजोत्तम। सर्वं वमनुजज्ञेष घृत
हीनं विवर्जयेत्। भुक्त्वा च सकृदेवान्नमाहारं वसमाचरेत्। पानीयपानं कुर्वंति ब्राह्मणानुमतेपुनः। प्रथमाहारं प्रथमग्रासं सर्वं मप्य
मश्चाहरं। एकमेव ग्रासं भक्षयित्वा अशिष्टमन्नं त्यजेत्। ब्राह्मणानुमत्या पुनराहारमवशिष्टान्नभोजनं पुनः पानीयपानं च कुर्यादिति सर्वथा।
ब्राह्मणानुमत्या भुंजानोपि प्रथमग्रहीतं न भुंजीत ग्रहीतं हीनं विवर्जयेदिति निषेधात्। सेवत्सरमिदं कृत्वा ततः सात्त्विको दशाप्न जन्ने देवस्यत
स्मिन्नहनि भार्गव। संवत्सरं संवत्सरसुक्तं प्रतिपत्सु आत्रेयोदयामिति लिंगदर्शनात्। सवत्सं सहिरण्यं च तत्ते दद्याद्द्विजातये। अनेनैव तोपक
रणं प्रतिमादि। व्रतेनानेन धर्मज्ञ रोगमेवं व्यपोहति। आरोग्यमाप्नोति गाति तं पाश्र्वो यशस्तथा। सुविपुलां भोगान्। व्रतेन सम्यक्कृतरूपे
पनारीसंप्रजेपेधस्तु जगत्प्रधानं। जगत्प्रधानं सूर्यं। इति आरोग्यप्रतिपद्व्रतं। अथास्यामेव कौंदिचाव्रतं मदनरत्ने विष्णुधर्मे मार्कंडेय
उवाच। अष्टपत्रं तु कमलं बिन्दुसे हृणकैः शुभैः। ब्रह्माणं कर्णिकायां तु न्यस्य संपूजयेद्विभुं। ऋग्वेदं पूर्वपत्रे तु यजुर्वेदं तु दक्षिणे। पश्चिमे
सामवेदं तु उदक् चाथर्वणं तथा। आग्नेये चतथो गानि धर्मशास्त्राणि नैर्ऋते। पुराणं चेवरावायके रैशान्यां न्यमपिन्नरं। एवं दिव्यस्यधर्मज्ञः राम: १८

सोपवासस्तु पूजयेत्। देवमुक्तमथा रम्यसोपवासो जितेंद्रियः। सप्रतिपदं प्राप्य मुक्तपदस्य पादवासं वत्सरं महाराजमुक्त
गंधानुलेपनैः। भूरिणा परमान्नेन धूपदीपेरनेकैः। ततः संवत्सरान्ते गां दद्याद्धृतेचीर्णे नरोत्तम। इदं व्रतं यस्तु करोति राजन्सवेद
वित्स्याद्बहुविधमनिष्टः। कृत्वा सदाह्वादश वत्सराणि विरिंचिलोकं तु तथः प्रयाति। इति विद्याव्रतिपद्व्रतं। अथात्रैव भविष्यो
क्तं तिलकव्रतं। श्रीकृष्ण उवाच। वसंते किंशुकाशोकशोभिते प्रतिपत्तिथौ। मुक्ताहस्नां प्र कुर्वीत स्नानं नियममास्थितः। नारी
नरो वा राजेंद्र संतर्प्य पितृदेवताः। न घास्तीरे तडागे वा गृहे वा जलसंयतः। पिष्टातकेन विलिखेद्वत्सरं पुरुषाकृतिं। पिष्टात
कः पटवासको गंधद्रव्यचूर्णविशेषः। ततश्चंदनचूर्णेन पुष्पधूपादिनार्चयेत्। मासर्तुनामभिः पश्चान्नमस्कारान्तयोजितैः। मा
सर्तुनामभिश्चैत्रवसंतादिकनामभिः पूजयेद्ब्राह्मणो विद्वान्मंत्रैर्वेदोदितैः शुभैः। संवत्सरोसीतिपठन्मंत्रं वेदोदितं द्विजः। नमस्का
रेणमंत्रेण शूद्रोपीत्यं प्रपूजयेत्। शूद्रोपीत्यनेन स्त्रीसंग्रहः। तासां विशेषविध्यभावेवैदिकमंत्रानधिकारात्संवत्सरोसि
परिवत्सरोसीत्यादिर्यजुर्वेदप्रसिद्धो मंत्रः। नमस्कारेण संवत्सरायनम इत्यादिना। एवमभ्यर्च्य वासोभिः पक्वान्नमामि
वेदयेत्। कालोद्भवैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः। ततस्तं पूजयेत्सार्थपुरः स्थित्वा कृतांजलिः। भगवंस्त्वत्प्रसादेन वर्षं मे
ममिहास्तु मे। संवत्सरोपसर्गो मे विलयं यात्वशेषतः। एवमुक्त्वा यथाशक्त्या दत्त्वा विप्राय दक्षिणां। ललाटपट्टे तिलकं कुर्याच्चंद

ब्र॰ कै॰ १९ नं कजं ॥ ततः प्रभृत्यनुदिनं तिलकालंकृतं मुखं धार्यं संवत्सरं यावच्छशिनेव नभस्तलं ॥ एवं नरो वा नारी वा व्रतमेतत्समाचरेत् ॥ सदै
व पुरुषव्याघ्र भोगान् भुवि भुनक्ति सो ॥ अन्ते च तत्र शिवाये दुर्वारो वैरि रोगग्रहाः ॥ निरर्थकाम वं स्यते तिलकं वीक्ष्य तत्क्षणात्तानि
रर्थकाः प्रयोजनशून्या अनिष्टकरणे असमर्था इत्यर्थः ॥ अत्र वसंते प्रति पत्तिथ्यां एतत्कृत्स्नं प्रकुर्वीत तिलकं तन्मुक्ता प्रति
पल्लवा ॥ तथा व्रतमिदं चैत्रे न्यग्रहीतं द्विजसन्निधौ इत्यनेन चैत्रे त्यस्ये वेति विज्ञायते ॥ पूर्वमासीन्महीपालो नाम्ना शत्रुंजयो नृपः ॥ दि
व लेखेति तस्यान्त्यजा पी चारित्रभ्रंशणा ॥ तथा व्रतमिदं चैत्रे गृहीतं द्विजसन्निधौ ॥ वत्सरं समुपोष्य त्वा यथा तान् हरिजनार्दनं ॥ हंतु मा के
ति कामा वा समागच्छति यः पुरः ॥ प्रयाति प्रियकृत्तस्या दृष्ट्वा तु तिलकं नरः ॥ सपत्नी दर्पप्रहा वशी कृत महीतला ॥ भर्तुर्हृद्यात्प्रहस
सा सुरत माते निराकुला ॥ यावत्करे राज्ञि भृतो भर्तुः पुत्रः सवेदनः ॥ शिरो त्रिर्नासंपातः सुहृदां स्वर्गदायकः ॥ शिरो त्रिर्नाम पातः शि
रो वेदना युतः ॥ धर्मराजपुरात्प्राप्ताः सर्वभूतापहारकाः ॥ तस्मिन्नुक्ते महाराज धर्मराजस्य किंकराः ॥ तस्याद्वारमनुप्राप्ताः प्रविष्टा
गृहमंजनाः शत्रुं नयं समानेतुं कालमृत्युपुरःसराः ॥ पार्श्वस्थितां दिव्य लेखां तिलकालं कृतानना ॥ दृष्ट्वा प्रनष्टसंकल्पा पराङ्मुखग
ताः पुनः ॥ गते च तस्मिन्पुत्तसत्वः पुत्रेण सह भारत ॥ नीतु जो वु भुजे भोगान्पूर्वकर्मार्जितान्सुभावः ॥ अक्रूरेण समाख्यातं तं ममर्त्य युधि राम॰
ष्ठिर ॥ एतत्त्रिलोक तिलकाख्य विभूषणं च पुण्यं व्रतं सकल दुष्टहरं वरं च ॥ इत्थं समाचरति यः समुखं विदित्वा तपमर्त्य त्र यातिपदमच्यु १९

तमिंदु मौलेः ॥ इति तिलकव्रतं ॥ अथ यमादर्शनाख्यं तिथिः प्रतिपदादिशोमवासरमात्मवारव्रतं शेषतं युधिष्ठिर उवाच ॥ त्वयी केश
व मया कारि व्रतदानान्यनेकधा ॥ श्रोतुमिच्छामि देवेश व्रतं संपत्तिदायकं ॥ येन व्रतेन देवेश पुनाराज्ये लभामहे ॥ तथा व्रतं तु मे ब्रू
हि यादवानां कृपाकर ॥ भगवानुवाच ॥ वदामि शृणु भद्रं पार्थ लक्ष्मीवृद्धिप्रदायकं ॥ धर्मार्थकाममोक्षाणां निदानं परमं व्रतं ॥ युधिष्ठिर उवाच के
न चादौ पुराचीर्णं मर्त्ये केन प्रकाशितं ॥ विधिना केन कर्तव्यं तत्सर्वं ब्रूहि केशव ॥ भगवानुवाच ॥ आसीत्सौम्यपुरे राजा सोमो नामेति
विश्रुतः ॥ क्षत्रधर्मेति कुशलः प्रजापालनतत्परः ॥ तस्य राज्ये प्रजाः सौम्याः सर्वधर्मपरायणाः ॥ तस्य राजस्तु वामात्यः सौविसोमः
सुभादृशः ॥ तस्मिन्नत्र वस्तु सौम्यं च सदा सोमपुनाहुतं ॥ अत्र सोमेश्वरो देवो लोकानां पालनाय च ॥ तत्राभवत्सोमशर्मा ब्राह्मणो वेद
पारगः ॥ वेदार्थविद्याशास्त्रविस्त्य मुक्तावादेति दुर्लभः ॥ तस्य भार्या सुभा चारा युरंध्री वा सुभाषिणी ॥ भर्तृशुश्रूषणारता कल्याणी प्रि
यवादिनी ॥ सोऽकरोद्व कुटुंबार्थं करायणं दिने दिने ॥ न लभ्यते धिकं ते न धनं धान्यं तथैव च ॥ अतीव खेदखिन्नस्तु दिवा च पुनः पु
नः ॥ किं करोमि क्व गच्छामि सभार्योऽहं महीतले ॥ न कर्मविपाके नई दृशं लभ्यते फलं ॥ अथ वार्धक्यं धर्मदे वव्रतादिकं सुभं ॥ स
सोमेशोऽकरोद्भक्तिं दैन्यनाशाय पार्थिव ॥ कदाचित्तेव त्रौ सोपव्रजन्ग्राम सरोवरं ॥ अत्र सोमेशः प्रतकृत्यास्मिन्सौम्यसरोवरे ॥ ददर्श
लरात्त्रपेराह्णपयापरयापुतः ॥ ते न संदुःखितो दृष्टः सोमशर्मा द्विजोत्तमः ॥ किमर्थं क्रियते दुःखं त्वया पाचरणे न वा ॥ किं चिह्नं

व्रता. त्वं नास्ति ग्रंथे तदर्थमीदृशे फलं। तस्य तद्वचनं श्रुत्वा ब्राह्मणाः स्निग्धमब्रवीत्। भो भो विप्र वरश्रेष्ठ व्रतमेकं वदामि ते। तेनादिष्टं व्रतं चे
२० दं तथासंपत्तिदायकं। लोमशउवाच। भो भो ब्राह्मणशार्दूल व्रतं तद्वद मे प्रभो। यस्यानुष्ठानमात्रेण लक्ष्मीर्दृढा प्रजायते। कस्मि
न्मासे च कर्तव्यं किं दानं कस्य भोजनं। धनलाभाय कर्तव्यं कस्य पूजनं। कैस्तु पुष्पैः प्रकर्तव्या पूजा चात्र तपोधन। नैवेद्यं कीदृशं दे
यं अर्घ्यं कैस्तु फलैर्भवेत्। यदि तुष्टोसि विप्रेंद्र तत्सर्वं ब्रूहि मे प्रभो। ब्राह्मणउवाच। साधु त्वया विप्र पृष्टं व्रतं वृद्धिप्रदायकं। आवेशात्तु
सि ते पृच्छे प्रथमे सोमवासरे। प्रकर्तव्यं व्रतं विप्र मुने नियमपूर्वकं। सार्धमासत्रयं विप्र कर्तव्यं विधिपूर्वकं। बिल्वदले स्तु कर्तव्य
चतुर्दश्यां तु कार्त्तिके। व्रतारंभे तु कर्तव्यो नियमस्तु दिवाकरोः। अथारभ्य व्रतं देव रोटकाख्यं मनोहरं। करोमि परया भक्त्या पाहि
मां जगतां गुरो। दिने दिने प्रकर्तव्या पूजा देवस्य शूलिनः। कथां विना न भोक्तव्यं प्रत्यहं च पुनः पुनः। उपोषणं तु चतुर्दश्यां कर्तव्यं वि
धिपूर्वकं। भुवि भर्त्वादिनेतस्मिन् कर्तव्यं रोटकव्रतं। चतुर्दश्यां निराहारः स्थित्वा चैव परेहनि। भो स्वामिपार्वतीनाथ सर्वसि
द्धिप्रदायक। उपोषणमंत्रः। कृत्वा माध्याह्निकं कर्म नित्यं स्नानादिकं तथा। तस्यां रात्रौ तु कर्तव्या पूजा देवस्य शूलिनः। कृमादि
शुभे चैतस्य देशे तु कर्तव्यं पुष्पमंडपं। मध्ये स्नात्र शिवो देवो धर्मकामार्थसिद्धये। क्षीरादिस्नपनं कुर्याच्चंदनादिविलेपनं। कृष्णा
गरुसकर्पूरं मृगनाभिविमिश्रितं। पुष्पैर्नानाविधै रम्यैः पूज्यो देवो महेश्वरः। धनकामेन कर्तव्या पूजा देवस्य शूलिनः। बिल्वपत्रै रा.म. २०

रखंडैश्च तुलसीपत्रकैस्तथा। नीलोत्पलैश्च कर्तव्या पुण्यवर्द्धनी। कह्लारकमलैश्चैव कुमुदैश्चातिशोभनैः। चंपकैः पूजा तु
कर्तव्या घृतपूर्णा मनोरम्या। तं पत्रैकैः मालतीपुष्पैः कुंदैश्च स्तबकैः। मंदारैरर्कपुष्पैश्च पूजा चान्यैः शिवप्रियैः। अन्यैर्नानाविधैः पु
ष्पैः ऋतुकालोद्भवैः शुभैः। नैवेद्यैर्नानाविधैः पार्थ पुण्यवर्द्धनसाधकैः। दीपास्तत्र प्रकर्तव्या घृतपूर्णा मनोरमाः। लिह्यपेयैस्तथा भो
ज्यैः स्वादुभिश्च शिवप्रियैः। अन्यैर्नानाविधैरम्यैस्तथा विप्रवरेस्ततः। नैवेद्यं तु प्रकर्तव्यं रोटकानां विशेषतः। कर्तव्या रोटकाः पंच पुरु
षाहारमानतः। द्वौ तु विप्राय दातव्यौ द्वाभ्यां वै भोजनं शुभं। एको देवाय दातव्यो नैवेद्यार्थं सदा बुधैः। महेशाय सदा तस्यै तांबूलं सुमनो
हरं। अर्घ्यदानं प्रकर्तव्यं यथासंपत्तिदायकं। पिडाफलं नारिकेलं जंबीरं बीजपूरकं। खर्जूरी चम्पुभाक्षा कामातुलिंगं मनोरमं। आखो
टानि च दाडिंबं नारंगानि शुभानि च। कर्कटी चम्पुभाण्डा अर्घ्यदानेन मनोहरा। अन्यैर्नानाविधैः पार्थ ऋतुकालोद्भवैः शुभैः। पुष्करो
त्यर्घ्यदानं च तस्य पुण्यं वदाम्यहं। ईलां ससागरां हेमरत्नैश्चान्यैर्मनोरमैः। दत्वा यत्फलमाप्नोति तेन तत्फलमाप्नुयात्। अनेनैव वि
धानेन तत्कार्यं व्रतसिद्धये। पंचवर्षं तु कर्तव्यमंते तु लेखनमीप्सुभिः। पश्चादुद्यापनं कुर्याद्रोटकाख्यव्रतस्य च। उद्यापनेन तु कर्तव्यौ
हेमरौप्यौ तु रोटकौ॥ इति श्रीभविष्यपुराणे बिल्वरोटकव्रतं। अथ कार्त्तिकशुक्लद्वितीयायमद्वितीया सा चापराह्णव्यापिनी। ऊर्ज्जे शुक्ल
द्वितीयायामपराह्णेऽर्चयेद्यमं। स्नानं कृत्वा भानुजायां यमलोकं न पश्यति। ऊर्ज्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमं। स्नानं कृत्वा भानुजायां

व्र॰र्क॰ यमलोकं न पश्यति। ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः। वेष्टितः किंनरैर्हृष्टैस्तस्मै यच्छति वांछितमिति स्कांदात्। दिनद्वयेऽपरा
२१ ह्नव्याप्तावव्याप्तौ वा परैव युग्मवाक्यात्। हेमाद्रौ भविष्ये। प्रथमाश्चावरोमासितपक्षेदपरा। तृतीया च शुचौ मासि
चतुर्थी कार्त्तिके भवेत्। आद्या वै कलुषा नाम तथा भाद्रे च निर्मला। आश्विने प्रेतसंचारा कार्त्तिके याम्यनामतेति। चतस्रो द्वितीया उपक्र
म्य प्रथमायां किंचित्स्नायात् द्वितीयायां सरस्वतीपूजा। तृतीयायां श्राद्धं कर्तव्यत्वेनत्तव पितृचतुर्थ्यां मस्यां कर्तव्यमुक्तं। कार्त्ति
के शुक्लपक्षे तु द्वितीयायां युधिष्ठिर। यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः। अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता। अस्यां नि
जगृहे पार्थ न भोक्तव्यमतो नरैः। यत्नेन भगिनीहस्तात् भोक्तव्यं पुष्टिवर्द्धनं। दानानि च प्रदेयानि भगिनीभ्यो विशेषतः। स्वर्णालंकार
वस्त्रान्नपूजासत्कारभोजनैः। सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः। प्रतिपन्नकास्तत्स्थाने मताः। पितृव्यभगिनीहस्तात् प्रथमा
यां युधिष्ठिर। पितृव्यभगिनी पितृव्यसंबंधेन भगिनी पितृव्यकन्येत्यर्थः। मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप। पितृमा
तुःस्वसुर्वैव तृतीयायां तथा करात्। भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परं। सर्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनं। धन्य
यशस्यमायुष्यं धर्मकामार्थसाधकं। यस्यां तिथौ यमुनया यमराजदेवः संभोजितो निजकरात्स्वसृसौहृदेन। तस्यां स्वसुः करतलादि रा॰म॰
ह यो भुनक्ति प्राप्नोति रत्नधनधान्यमनुत्तमं सः। इति हेमाद्रौ भविष्ये यमद्वितीयाविधिः। अत्रैव भ्रातृद्वितीयाविधिस्तिथितत्त्वे। स्कांदे पा २१

त्तु भोजयेन्नारी भ्रातरं शुभके तिथौ। अर्घं येवापितां दैलैर्न सोदैर्घ्यमाप्नुयात्। भ्रातुरायुःक्षयो नैव भवेत्तत्र कर्हिचित्। तथा। यमं
च चित्रगुप्तं च यमदूतांश्च पूजयेत्। अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः। सहजद्वयैः भ्रातृभगिनीभिः। अर्घ्यमंत्रस्तु। एह्येहि मार्कं
डतपाशहस्त यमांतकालोकधरामरेश। भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते। धर्मराज नमस्तुभ्यं नमस्ते यमुना
ग्रज। पाहि मां किंकरैः सार्द्धं सूर्यपुत्र नमोऽस्तु ते। इति। कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनं। या न कुर्याद्विनश्यंति भ्रातरः सप्त ज
न्मसु। पाधेडतरखंडे भेद्रे भगिरिमो मा नतस्त्वं दंष्ट्रीसरसीरुहे। प्रेषसे च नमस्तुभ्यमागतोऽस्मि तवालयं। मृदुवाक्यं ततः श्रुत्वा सत्त
रं क्रियते तदा। अथ भ्रातृमती भ्रातस्त्वपाथना सिमानदा। भोक्तव्यं चैव मद्गेहे स्वायुषे मम मानदा। कार्त्तिके शुक्लपक्षस्य द्वितीयायां सहोदर॥
यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः। अस्मिन्दिने यमेनानारीका पुरुषोऽपि वा। आपादिताः कर्मपाशैः स्वेच्छया ये पचंतिहि। पापेभ्यो वि
प्रमुच्यास्ते मुक्ताः कर्मनिबंधनात्। तेषां महोत्सवो वृत्तो यमराष्ट्रे सुखावहः। तस्माद्दंधोऽत्र मद्गेहे भोजनं कुरु कार्त्तिके। आशिषः प्रति स
त्वास्मान नमस्कृत्य नेत्ता च यत्नतः। सर्वा भगिन्यः संपूज्या ज्येष्ठा उभयतस्तथा। वस्त्रादिनानमस्कार्या निजवित्तानुसारतः। भ्रातुरायुष्य वृद्ध
र्थं भगिनी श्रियमस्य देया। तृतीयाप्रयत्नेन प्रतिमा स्वदिपानतः। मार्कंडेयो बलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुराम
अष्टैते चिरजीविनः। मार्कंडेय महाभाग सप्तकल्पांतजीवित। चिरंजीवी यथा त्वं हि तथा मे भ्रातरं कुरु। इति भ्रातृद्वितीयाविधिः॥

व्र॰र्क॰ २२

इति श्रीमन्नीलकण्ठात्मजशंकरकृते व्रतार्के द्वितीयाव्रतानि ॥ अथ तृतीयाव्रतानि ॥ तत्रैव मुक्ता तृतीयायां सौभाग्यशयनव्रतं ॥ मा
त्स्ये मत्स्य उ॰ ॥ वसंतमासमासाद्य तृतीयायां जनप्रियं ॥ सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिः ॥ पूर्वाह्ने तु सतिलैः स्ना
नं समाचरेत् ॥ तस्मिन्नहनि सा देवी किल विश्वात्मना सती ॥ पाणिग्रहणिकैर्मन्त्रैरुद्वाहवरवर्णिनी ॥ तया सहैव देवेशं तृतीयायां सम
र्चयेत् ॥ फलैर्नानाविधैर्धूपदीपनैवेद्यसंयुतैः ॥ प्रतिमां पंचगव्येन तथा गंधोदकेन च ॥ स्नापयित्वार्चयेद्गौरीमिंदुशेखरसंयुतां ॥ नमो
ऽस्तु पाटलायेति पादौ देव्याः शिवस्य तु ॥ शिवायेति च संकीर्त्य जयायै गुल्फयोस्तथा ॥ त्रिपुरघ्नायेति रुद्रस्य भवान्यै जंघयोर्युगं ॥ शिवं रुद्राय
शान्त्यै जनमायैदिति जानुनी ॥ संकीर्त्य हरिकेशाय तथोरू वरदे नमः ॥ ईशायेति शं कटिं रत्यै शंकरायेति शंकरं ॥ कुक्षिं हृदयं च कोटव्यै शूलिनः
शूलपाणये ॥ मंगलायै नमस्तुभ्यमुदरं चाभिपूजयेत् ॥ सर्वात्मने नमो रुद्रमीशान्यै च कुचद्वयं ॥ शिवं वेदात्मने तद्वद्रुद्राण्यै कंठमर्चये
त् ॥ त्रिपुरघ्नाय विश्वेश अनन्तायै करद्वयं ॥ त्रिलोचनायेति हरं बाहू कालानलप्रिये ॥ सौभाग्यभवनायेति भूषणानि समर्चयेत् ॥ नमो देव्ये
री शहस्तसितांगीति नासिकां ॥ नमडग्रपलोकेशं ललितेति पुनर्भ्रुवौ ॥ शर्वाय पुरहंतारं वसुदेव्यै तथालकं ॥ नमः श्रीकंठनाथाय शि
तिकेशांस्तथार्चयेत् ॥ भीमोग्रसौम्यरूपिण्यै शिरः सर्वात्मने नमः ॥ शिवमभ्यर्च्य विधिवत्सौभाग्याष्टकमित्यतः ॥ स्थापयेद्घृतनिष्पाव रा॰म॰
कुसुंभक्षीरजीरकं ॥ तरराजेक्षुलवणं कुस्तुंबुरुमथाष्टमं ॥ दत्तं सौभाग्यकृद्यस्मात्सौभाग्याष्टकमित्यतः ॥ एवं निवेद्य तत्सर्वमग्रतः २२

शिवयोः पुरतः देवि शृंगोदकं ततः स्वपेद्भूमावरिंदम ॥ पुनः प्रभाते तु तथा कृतस्नानजपः शुचिः ॥ संपूज्य द्विजदांपत्यं माल्यवस्त्रविभूषणैः ॥
सौभाग्याष्टकसंयुक्तं सुवर्णप्रतिमाद्वयं ॥ प्रीयतामत्र ललिता ब्राह्मणाय निवेदयेत् ॥ एवं संवत्सरं यावत्तृतीयायां महामुने ॥ प्राशने दा
नमंत्रे च विशेषोयं निबोध मे ॥ गोशृंगोदकमाद्ये स्याद्वैशाखे गोमयं पुनः ॥ ज्येष्ठे मंदारकुसुमं बिल्वपत्रं शुचौ स्मृतं ॥ श्रावणे दधिसंप्रा
श्यं नभस्ये च कुशोदकं ॥ क्षीरमाश्वयुजे मासि कार्तिके पृषदाज्यकं ॥ मार्गशीर्षे तु गोमूत्रं पौषे संप्राशयेद्घृतं ॥ माघे कृष्णतिलं तद्वत्
पंचगव्यं तु फाल्गुने ॥ ललिता विजया भद्रा भवानी कुमुदा शिवा ॥ वासुदेवी तथा गौरी मंगला कमला सती ॥ उमा च दानकाले तु प्रीयता
मिति कीर्तयेत् ॥ मल्लिकाशोककमलकुंदं तोत्पलमालती ॥ कुब्जकं करवीरं च बाणमम्लानकुंकुमं ॥ सिंदुवारं च सर्वेषु मासेषु क्रम
शः स्मृतं ॥ पारांनीलकुरंटः ॥ जपाकुसुंभकुसुंभमालती शतपत्रिका ॥ यथालाभं प्रशस्तानि करवीरं च सर्वदा ॥ एवं संवत्सरं यावदुपोष्य
विधिवन्नरः ॥ स्त्री वा भक्ता कुमारी वा शिवावभ्यर्च्य शक्तितः ॥ व्रतांते शयनं दद्यात्सर्वोपस्करसंयुतं ॥ उमामहेश्वरं हैमं वृषभं च गवा सह ॥
स्थापयित्वा च शयने ब्राह्मणाय निवेदयेत् ॥ गोपुगं हैमं ॥ अन्यान्यपि यथाशक्त्या मिथुनान्यंबरादिभिः ॥ धान्यालंकारगोदानैरभ्य
र्चयेद्धनसंचयैः ॥ वित्तशाठ्येन रहितः पूजयेद्गतविस्मयः ॥ एवं करोति यः सम्यक् सौभाग्यशयनव्रतं ॥ सर्वान्कामानवाप्नोति पदमानंत्यमश्नु
ते ॥ फलस्यैकस्य वै सांगमेतत्कुर्वन्नमाचरेत् ॥ यच्च कीर्तिं समाप्नोति प्रतिमासं नराधिप ॥ सौभाग्यारोग्यरूपायुर्वस्त्रालंकारभूषणैः ॥

व्र·कं·
२३

नवियुक्ता भवेन्नारी त्वं हि पुत्रवती तथा यस्तु द्वादशवर्षाणि सौभाग्यशयनव्रतं । करोति सततं चाष्टौ वा श्रीकंठभवने मेरोः । क्षमानावसे
त्तस्य कथा वत्कल्पा पुत्रत्रयं । नारी वा कुरुते यापि कुमारी वा नरेश्वर सापि तत्फलमाप्नोति देव्या सु महलालिता ॥ इति मात्स्ये सौभाग्य
शयनव्रतं । अथैव गोपीदोलोत्सवः तदुक्तं हेमाद्रौ देवीपुराणे । तृतीयायां यजेद्देवीं शंकरेण समन्वितां । कुंकुमागरुकर्पूरमणिवस्त्र
स्रगर्चितं । सुगंधपुष्पधूपैश्च दमनेन सुमालिना । आंदोलं दोलये द्वात्र शिवो मा तु प्रीयते सदा । रात्रौ जागरणं कार्यं प्रातर्दद्यात्तु दक्षि
णां । सौभाग्याय सदा स्त्रीभिः कार्यौ पुत्रसुखादिभिः ॥ अथ चैत्रशुक्लतृतीयायामरुंधतीव्रतं तत्र स्त्रीणामेवाधिकारः । अथ देवस्याथ दिक्
लक्ष्य वरणात । अथ ध्यानं । अष्टकर्णिकया युक्ते मंडले पूजयेत्तु तां । अरुंधतीं महादेवीं वसिष्ठसहितां सतीं । आवाहनं । अरुंधति महादे
वि त्वं सौभाग्यदायिके । दिव्यं सुचारु वेषं च आसनं प्रतिगृह्यतां । आसनं । सुचारु शीतलं दिव्यं नानागंधसुवासितं । पाद्यं गृहाण दे
वेशि अरुंधति नमोस्तु ते । पाद्यं । अरुंधति महाभागे वसिष्ठप्रियवादिनि । अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते । अर्घ्यं । गंगातोयं
समानीतं सुवर्णकलशे स्थितं । आचम्यतां महाभागे वसिष्ठसहितेनघे । आचमनं । गंगा सरस्वती रेवा पयोष्णी नर्मदाजलैः । स्ना
पितासि मया देवि त्रयस्त्रिंशति कुरुष्व मे । स्नानं । नारागसमुद्भूतं दिव्यं चारु मनोहरं । वस्त्रं गृहाण देवेशि अरुंधति नमोस्तु ते । वस्त्रं । क
र्पूरकुंकुमैर्युक्तं हरिद्रादि समन्वितं । कस्तूरिकासमायुक्तं चंदनं प्रतिगृह्यतां । चंदनं । अक्षतास्त्रस्तरश्रेष्ठा कुंकुमाक्ताः सुशोभनाः । भ राम·
२३

मालालंकारसिद्ध्यर्थं श्री सर्वं प्रतिगृह्यतां । मास्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो । मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां ॥
पुष्पं । वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः । आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां । धूपं । आज्यं च वर्तिसंयुक्तं वह्निना योजितं म
या दीपं गृहाण देवेशि त्रैलोक्यतिमिरापहं । दीपं । अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं । नैवेद्यं गृह्यतां देवि प्रसादं कुरु सर्वदा । नै
वेद्यं । पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं । कर्पूरादिसुसंयुक्तं तांबूलं प्रतिगृह्यतां । तांबूलं । इति फलं । हिरण्यगर्भ इति दक्षिणा
। पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते । अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते । मूलमंत्र प्रार्थना । अरुंधति महाभागे वसिष्ठप्रि
यवादिनि । सौभाग्यं देहि मे देवि धनं पुत्रांश्च सर्वदा । उत्तरार्ध्यं हि भुजां चारुसर्वांगी साक्षसूत्रकमंडलुं । प्रतिमां कांचनीं कृत्वा नामभिः प्र
रित्तमये ता श्रं देववंद्ये नमः पादौ पूजयामि । लोकवंद्ये जानुनी संपत्तिदायै कटिं । गंभीरनाभ्यै नाभिं । लोकधात्र्यै स्तनौ । जगद्धात्र्यै ·
कंठं त्वै वाक्प्रवरदायै । हस्तौ धृत्यै मुखं अरुंधत्यै शिरः सकलप्रियायै शिरः सकलप्रियायै शिरः । वसिष्ठप्रियायै सर्वांगं
ततो नीराजनं । पुष्पांजलिश्च वंशपात्रे स्थितं तद्वर्णां वाराकं द्रव्यसंयुक्तं । अरुंधती दानाय द्विजाय ब्राह्मणाय ददाम्यहं । वारकं । सुवर्णमूर्ति
सयुक्तां वसिष्ठेन सुशोभितां । अरुंधती प्रीतयेऽर्थं ब्राह्मणाय ददाम्यहं । मूर्तिदानमंत्रः । गच्छ देवि यथास्थानं सर्वालंकारभूषिते । अ
रुंधति नमस्तुभ्यं देहि सौभाग्यमुत्तमं । विसर्जनं । अरुंधतीपूजनं ॥ अथ कथा स्कांदे । स्कंद उवाच । अरुंधती व्रतं वक्ष्ये नारीसौभाग्यदायकं ।

व्र. कं. २५

ये नदीरीनवेसम्यक्नारीसौभाग्यमाप्नुयात्॥ जायते रूपसंपन्ना पुत्रपौत्रसमन्विता॥ वसंते तु समासाद्य तृतीयां तु सुपर्वमासे स्नानं कृत्वा
तु देवं सम्यक् त्रिरात्रोपोषिता सती॥ मिथुनानि च चत्वारि समाहूय पतिव्रता॥ भोजयेत्तु ततो देवं लेपयेद्गंधैः कुंकुमागरुकर्पूरैः सिं
दूरैर्विनामिः शिलापट्टे न संस्थाप्य जीरकं लवणान्वितं॥ एकैकेन समायुक्तं वस्त्रयुग्मेन वेष्टितं। अर्चयेद्देवमहादेवीं वसिष्ठाग्रासं
मितां। पतिव्रता नो सर्वा सौभाग्यं देवेश्वरी मिनी॥ हिमसुतां वारुणसंचीगीमरुत्स्तवक मंडलं प्रतिमां कां चनीं कृत्वा नामभिः परिपूजयेत्॥ दे
वदेवे नमः पादौ जानुनी लोकवंदिते॥ कटिं संपूजयेत्तस्या सर्वसंपत्प्रदायिनी। नाभिं गंभीरनाभ्यै तु लोकधात्र्ये तथा स्तनौ॥ जगद्धात्र्ये
तथा स्कंधौ बाहू शांत्यै नमस्तथा॥ हस्तौ तु वरदायै च मुखं बंधं नमः पुनः॥ अरुंधत्यै तथा पश्चात् शिरस्तु कमलप्रिया॥ एवं संपूज्य तां देवीं गं
धपुष्पोपचारकैः॥ इमं पित्रा सती देवी तत्र अर्घ्यं प्रदापयेत्॥ अरुंधति महाभागे वसिष्ठप्रियवादिनि॥ सौभाग्यं देहि मे देवि धनं पुत्रांश्च
सर्वदा॥ अन्नराद्यमं नः पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते॥ अन्नं मां सर्वकामांश्च देहि देवि नमोस्तु ते॥ कामिनामेवं सुवासिन्यो यसं पू
ज्या समाप्तिदिवसे सदा॥ धूपगंधाहतैः पुष्पैर्दद्यात् अर्घ्यं शामरुकान्वा होमं चैव तदा कुर्यात्तिलमिश्रघृतैः शुभैः॥ अष्टोत्तरशतं सम्यक्
पीतां मंत्रतः सुधीः॥ मिथुनानि द्विसंख्यानि भूषणाच्छादनादिभिः॥ नानाविधोपचारैश्च चतुर्विंशति संख्यया॥ आचार्याय सभार्याय वस्त्राणाभर
णानि वा शय्यां सोपस्करं दद्यात् कांस्यपात्रं सुदीपकं॥ आदर्शं चामरं चैव वंदेत्तुं दद्यात्तु शोभनं॥ पश्चात्तु भोजयित्वा यतिपः सपीत्रमोदका राम. २५

अर्कं च नंदे वैतत्तयावसुन्यया विधिं पोलिका घृतपक्वाश्च पूरिकाश्च विशेषतः॥ सोहालिकाश्च दातव्याः एकैकं द्विगुणं तथा॥ भोजनं द्वयपं
भी मंदीनानायांस्य प्रजयेत्॥ एवं व्रतं समाप्याथ पश्चात्रक्तं समाचरेत्॥ अनेनैव विधानेन मानिनी कुरुते व्रतं॥ अवैधव्यमवाप्नोति तथा
जन्मसहस्रकं॥ पुत्रपौत्रसमायुक्ता धनधान्यसमावृता॥ जीवेद्वर्षशतं साग्रं सह भर्त्रा महाव्रता॥ एवमभ्यर्चयित्वा तु पदं गच्छेदनामयं देवभा
षीयया स्वर्गे क्रापिभार्यां तयैव वा॥ राजभार्या महाभागा सर्वकामफलप्रदं॥ पुरावृत्तमिदं विप्रा मया उक्तं व्रतमुत्तमं॥ आसीद्द्विजः पुरा विप्राः
सर्ववेदविशारदः॥ तस्यैका कन्यका कन्या ज्ञाता रूपेण प्रतिमा भुवि॥ ततो विवाहे समये देवि तातस्या करोद्विजः॥ बालरंडा तु सा जाता निर्वे
दाद्गमदूहात्॥ यमुनातीरमासाद्य चकार विपुलं तपः॥ एकभक्तादिकैः सैव कृच्छ्रचांद्रायणैस्तथा॥ मासोपवासनियमैरात्मानं भावयन्त्सतां
कदाचित्तत्र भगवन्गौर्या सह शिवः॥ यमुनातीरमासाद्य विनीतां तां ददर्श सा॥ कृपया च शिवो गौरी महादेवमुवाच सा॥ देवकेनेदं शी
ला बाला देव्यतां दृशो॥ देवेश्वर महादेव कृपां कुरु कृपानिधे॥ महादेव उवाच॥ अयं द्विजः पुरा गौरि कुलशील सुतो भुवि॥ तेन कन्या परिद
त्ता स्वरूपा गुणवती सती॥ सा तां विवाह्य तरुणीं विदेशं यागमद्द्विजः॥ तस्याव कृतिपंकाले सा परस्यतपितुरागमं॥ आगतस्तु तदा विप्रो पावज्जी
वेगतो द्विजः॥ तस्या जन्मान्तरं संवर्णनिःफलेपतिन्नादिना॥ तेन पापेन विप्रोसौ नारीत्वं प्राप्तवान् शिवे॥ स्वनारीयः परित्यज्य निर्दोषां कुलसंभवां॥
पातिदेशांतरे चाप्यसौ धाइवमहाशिवे॥ परदाररतो वा स्याद्दन्यां वा कुरुते स्त्रियं॥ सोन्यजन्मनि देवेशि स्त्री भूत्वा विधवा भवेत्॥ पानाशी तु पतिस

त्का मनोवाक्काय कर्मभिः। रहः करोति वै जारं गत्वा वा तु रूपां नरं। भोगान् भुक्त्वा च या पापा विश्वेदेन प्रमदा सती। तेन कर्मविपाकेन सा नारी वि
धवा भवेत्। स्वपत्नीं कुलसंभूतां पतिव्रतरतां सतीं। अनुकूलां परित्यज्य परां यो याति चेछया। स पापी जायतेऽन्यस्मिन् स्त्री हीनो द्विजजन्मनि।
अनेन तस्य दशां देवि लोके स्मिन्नास्ति पातकं। नैवेधव्यात्परो व्याधिर्न वैधव्यात्परो ज्वरः। नैवेधव्यात्परः शोको न वैधव्यात्परो कुशः। स्त्रियो न
च वैधव्यात्कष्टं वैधव्यतान्न पातेन पापेन बहुना जायते बालरंडिका। इति तस्य वचः श्रुत्वा सा गौरी विस्मिता भवत्। पप्रच्छ तं महादेवं गौ
री सा करुणान्विता। केन दत्तं महत्पापं बालवैधव्यदायकं। नश्यते कर्मणा केन तन्मो वद कृपां कुरु। महादेव उवाच। शृणु देवि प्रवक्ष्यामि
बालवैधव्यनाशनं। अरुंधतीव्रतं पुण्यं नारीसौभाग्यदायकं। यत्कृत्वा बालवैधव्यान्मुच्यते नात्र संशयः। श्रुतं मेन त्वदा दिव्यागौपी शंकर
तो व्रतं। यमुनातीरमासाद्य उपदिष्टं तदा द्विजाः। तस्येनायैर्महादेव्याः कृतमेतत् व्रतं तया। तेन पुण्येन महता व्रतजेन मुनीश्वराः। सा का
री वागमत्स्वर्गं मुक्ता वैधव्यतस्तदा। इयं व्रतफलं सम्यक् उपदिष्टं मुनीश्वराः। कृतमन्येभ्य बहुभिः सेव्यमुक्तानसंशयः। अरुंधतीव्रतमि
दं एतत्कार्यं मुनीश्वराः। नारी वैधव्यतो मुच्येत् सौभाग्यं प्राप्नुयात् परं॥ इति रेमा दे स्कांदे अरुंधतीव्रतं। अथ वैशाखशुक्लतृतीयायां भवि
ष्योक्तो कृतयुगतृतीयाव्रतं। इयं च या द्वादोषपूर्वा ह्यव्यापिनीग्राह्या। दैवयुक्ते द्वे तथा कृतयुगादीक वयो विदुः। युग्मेयोर्वाह्निकेयाद्यं
कं संवैवापराह्निके इति नारदीयात्। पर्वा कृत्तु सदायाह्ययुक्ता मनुयुगादयः। दैवे कर्मणि पित्र्ये च कृष्णे पैवापराह्निका इति गारुडात्।

अत्र पूर्वाह्णपरास्तु पादे द्वे कादिमागपरादिति। अथ विधिः। वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुं। नारायणं ह जपेद्याः पुष्पधूप
विलेपनैरिति। तथा पौत्सांटसातिकरकान्वारिबीजसमन्वितान्। सत्यातिपुष्पो बीरलो कान्ते हेममालिनः। बीजमंत्रं। हेममालीस्वर्यः। त
था। वैशाखमुक्तपक्षे तु तृतीयायां नैवेद्य गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः। तथा तत्रैव। कृतमत्र वाचा। बहुनात्र किमुक्तेन किं
बहुदरमालया। वैशाखस्य सिता मे कां तृतीयामक्षयां स्मराः। तस्यां स्नानं जपो होमः स्वाध्यायः पितृतर्पणं। दानं च क्रियते तेन स्यात्तत्सर्वं वसा
द्विहाक्षयं। आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते। सर्वपापप्रशमनी सर्वसौख्यप्रदायिनी। पुरा महोदये पार्थ वणिगासीत्सुनिर्धनः।
प्रियंवदः सत्यवृत्तिर्देव ब्राह्मणपूजकः। पुराणस्यानेकं चित्रैत्मान्तकुटुंबव्याकुलोपि सन्। तेन श्रुता वाच्यमानात् तीयापोरोहिणी युता य
दास्याद्बुधसंयुक्ता तदासा तु महत्फला। तस्यां यद्दीयते किंचित्दक्षयं स्यात् देवहि। इति श्रुत्वा च गंगायां संतर्प्य पितृदेवताः। गत्वामा
गत्य करकान्वसान्नानुदकसंयुतान्। अन्नसर्गान्वहत्कुंभान् जले नवि मले न च। यवगोधूमलवणान् सक्तुदध्योदनं तथा। इक्षुक्षीरवि
कारांश्च सहिरण्यांश्च शक्तितः। शुचिः शुद्धेन मनसा ब्राह्मणेभ्यो ददौ वणिक्। भार्यया वार्यमाणोपि कुटुंबासक्तचित्तया। तावन्नस्तो
स्थिरे सत्वे मत्वा सर्वं विनश्वरं। धर्मासक्तमतिः पार्थ काले न बहुना ततः। जगाम पंचत्वमसौ वासुदेवमनुस्मरन्। ततः स कुशिषो जातः
कुशावत्यां युधिष्ठिर। वभूव चाक्षयां तस्य समृद्धिर्धर्मसंयुता। इष्टायैस्तु महायज्ञैः समाप्तवरदक्षिणैः। स ददौ गोहिरण्यादि दानान्य

व्रत॰ न्यान्यहर्निशं ॥ वुभुंजे कामतो भोगान्द्रदीनां धौतत्यथ्यचक्रोते ॥ तथाप्यरूपमेवास्य रूपं प्राप्नोति मतङ्गने ॥ अद्वार्शवं तत्तीयायां पद्मतं विम
२६ वंदिना ॥ इत्येतन्मे समाख्यातं अरूपकामव्रतमुपोषितविधिः ॥ तत्तीयां तु समासाद्य स्नात्वा संतर्प्य देवताः ॥ एकभक्तं तदा कुर्याद्वासुदेवं प्रपूजयेत् ॥
उदकुंभान्सकरकाञ्छाक्रान्सर्वरसैः शुभान्वितान् ॥ सर्वमेवान्नं सस्यं दाने प्रशस्यते ॥ क्षेत्रोपानत्प्रदानं च गोभूकों चनवासमं ॥ प्र घरिष्ट्रत
लं चान्नं तत्रदेयमदिशं कयाः ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥ अनाख्येयं न मे किंचिदस्ति सुतपस्तु तेनघ ॥ अरुंधतीयो रूप
सुपेति कृतेन दत्तं तेनानुरूपेति कथितं मुनिभिस्तृतीया ॥ उद्दिश्य देवतापित्र्यं क्रियते मनुजैस्तु यत् ॥ तद्रूपं भवति भारत सर्वमेव ॥ इति भवि
ष्योत्तरे क्रमरूपतृतीयाव्रतं ॥ अस्यामेव विष्णुधर्मोत्तरे क्रमरूपतृतीयाव्रतं ॥ वैशाखशुक्लपक्षे तु तृतीयायामुपोषितः ॥ अरूपं फ
फलमाप्नोति सर्वस्य सुकृतस्य तु ॥ तथा साकन्निकोपेतादिशेषं ताच पूजिता ॥ तत्र दत्तं हुतं जप्तं सर्वमक्षयमुच्यते ॥ अरूपा सा तिथि
स्तस्मात्तस्यां सुकृतमक्षयं ॥ अक्षतैः पूजने विष्णुस्तेन साक्षयरूपा स्मृता ॥ अक्षतैस्तु नरः स्नातो विष्णोर्दत्वा तथाक्षतान् ॥ सक्तं स्वसं स्कृ
तांश्चैव हुत्वा च भृगुनंदन ॥ एतामक्षयतृतीयां नः सर्वासां तु फलं लभेत् ॥ ॥ इति विष्णुधर्मे क्रमरूपतृतीयाव्रतं ॥ अथाचारप्राप्ता
वणशुक्लतृतीयायां स्वर्णगौरीव्रतं तत्र पूजादि ॥ देवि देवि समागच्छ प्रार्थयेहं जगन्मते ॥ इमां मया कृतां पूजां गृहाण त्वं सुरसत्तमे ॥ आवाहनं ॥ राम॰
भवानि त्वं महादेवि सर्वसौभाग्यदायके ॥ अनेकरत्नसंयुक्तमासनं प्रतिगृह्यतां ॥ आसनं ॥ सुचारुशीतलं दिव्यं नानागंधसुवासितं ॥ पाद्यं गृहा २६

ण देवेशि महादेवि नमोस्तु ते ॥ पाद्यं ॥ श्रीपार्वति महाभागे शंकरप्रियवादिनि ॥ अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते ॥ अर्घ्यं ॥ गंगा
तोयं समानीतं सुवर्णकलशस्थितं ॥ आचम्यतां महाभागे रुद्रेण सहितेनघे ॥ आचमनं ॥ गंगासरस्वतीरेवा कावेरीनर्मदाजलैः ॥ स्ना
पितासि मया देवि तथा शांतिं कुरुष्व मे ॥ स्नानं ॥ सर्वसत्वाधिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां ॥ व
स्त्रं ॥ कर्पूरकुंकुमैर्युक्तं हरिद्रादिसमन्वितं ॥ कस्तूरिकासमायुक्तं चंदनं प्रतिगृह्यतां ॥ चंदनं ॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां ॥ पुष्पं ॥ देवद्रुमरसोद्भूतः कालागरुघृतान्वितः ॥ आदीयते मया धूपो भवानि घ्राणतर्पणः ॥ धू
पं ॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवेशि त्रैलोक्यतिमिरापहं ॥ दीपं ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं ॥
नैवेद्यं गृह्यतां देवि प्रसादं कुरु सर्वदा ॥ नैवेद्यं ॥ कर्पूरैलालवंगादितांबूलीदलसंयुतं ॥ क्रमुकस्य फलैर्युक्तं तांबूलं प्रतिगृह्यतां ॥ तांबू
लं ॥ इदं फलं मया देवि स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ फलं ॥ हिरण्यगर्भमिति दक्षिणा ॥ पुत्रान्देहि धनं
देहि सौभाग्यं देहि सुव्रते ॥ अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते ॥ प्रार्थना ॥ भवान्याः सुमहाद्व्याव्रतसंपूर्णहेतवे ॥ प्रीतये द्विजव
र्याय वायनं प्रददाम्यहं ॥ वायनमंत्रः ॥ नानाषोडशपक्वान्नैर्दलपात्राणि षोडश ॥ कार्पासकादिभिर्युक्तान्याहृत्य द्विजदंपतीः ॥ व्रतोद्या
पनपूर्त्यर्थं ब्राह्मणेभ्यो ददाम्यहं ॥ स्वलंकृताः सुवासिन्यः पाठितव्रतेन च पूजिताः ॥ मम कामसमृद्ध्यर्थं प्रतिगृह्णंतु पूजिता ॥ इति गौरी

ब्र·खं· पूजा । पुष्टिहेतवे च । उद्यापनविधिं ब्रूहि त्वं तीर्थपाः सुरेश्वर । भक्तितः श्रोतुमिच्छामि संदर्शय हे तदा । श्रीकृष्ण उवाच । उद्यापनविधिं वक्ष्ये सावधा
२१ नेन देवेश्वर तु । त्रिंशद्दंडप्रमाणे शोभनप्रतिते दक्षिणायने । प्रत्यक्षप्राणपरित्यक्ते न वर्गो च मेति ष्यते । गोचरे मासे संक्लिष्यते मये निविचक्ष
णः । मंडलं कारयेत्तत्र नानावर्णैः सुशोभनं । गृहमंडलपार्श्वे तु पद्ममष्टदलं लिखेत् । तन्मध्ये स्थापयेत्कुंभं मम ब्रह्मांस्मरन्स्वयं शुभं । ताम्रपात्रं
प्रकुर्वीत पलैः षोडशभिर्मया । तदर्द्धं दिनवा कुर्याद्द्विजश्चाष्टं विवर्जयेत् । कर्षमात्रसुवर्णेन प्रतिमां कारयेद्बुधः । तदर्द्धं मध्यमं प्रोक्तं
तदर्द्धं तु कनिष्ठकं । कृत्वा तु पंचपलेन पार्वत्या च हरस्य च । अथ ताम्रमये पात्रे प्रतिष्ठा च कर्तव्या तु यथाविधि । पंचामृतेन स्नपनं कृत्वा
देवस्य चोत्तमं । स्थानं च कास्येत् तस्मात्ततः पूजां समारभेत् । चंदनेन सुगंधेन सुपुष्पैः प्रपूजयेत् । धूपं च कल्पयेद्देवं चंदनागरुसंयुतं ।
देवदेव समागच्छ प्रार्थयेहं जगत्पते । इमां मया कृतां पूजां गृहाण सुरसत्तम । एवं पूजा प्रकर्तव्या रात्रौ जागरणं ततः । गीतनृत्यादिसं
मिश्रां नाज्येन च परिप्लुता तु । संकर्षणोऽनिपर्पतां च कृष्णपुत्राकथा पुण्यकवाचनं । अर्द्धं यत्नर्द्धं वदे वं पश्चाद्धोमं च कारयेत् । स्वगृह्यो
क्तविधानेन कृत्वाग्निस्थापनं ततः । प्रारभेद्व्रतहोमं नवयप्तु रसः । तिलाज्यं पव संमिश्रा नाज्येन च परिप्लुता तु । संकर्षणोतिप
र्यता तु कृत्वा विधिवदाचरेत् । एवं समाप्य होमं तु तत्राचार्यं प्रपूजयेत् । अर्घ्यपुष्पप्रदानेन वस्त्रालंकारभूषणैः । शताम दद्या
सां कुर्यात्प्रकारैर्गौर्धिकाचितां । धेनुं सदक्षिणां दत्वा सुशीलां च पयस्विनीं । स्वर्णशृंगीं रौप्यखुरां कांस्यदोहनसंयुतां । रत्नपुच्छां च राम· २१

ये गौरी गिरिशं तु द्यार्ध्यं वाचनं ततः । दद्यात्स्वहमिति मंत्रोऽभ्यां वायरांश्चात् । अथ कथा । मेस्मालाकुलितालकापैकपालमालांकिताशे तु
रापादिव्यांबरायै वृषांगंबराय नमः शिवायै च नमः शिवाय । कैलासशिखरे रम्ये गौरी पृच्छति शंकरं । गुह्याद्गुह्यतरं गुह्यं कथयस्व महे
श्वर । सर्वेषां धर्मसर्वस्वमल्पायासं महत्फलं । प्रसन्नोसि यदा नाथ तथ्यं ब्रूहि ममाग्रतः । केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना । अना
दिमध्यनिधनो भर्ता चैव जगत्प्रभुः । ईश्वर उवाच । शृणु देवि प्रवक्ष्यामि तवाग्रे व्रतमुत्तमं । यत्नो यं मम सर्वस्वं कथयामि तव प्रियो यथाचो
डुगणे चंद्रो ग्रहाणां भानुरेव च । वर्णानां च यथा विप्रो देवानां विष्णुरुत्तमः । नदीषु च यथा गंगा पुराणानां तु भारतं । वेदानां च यथा सा
म इंद्रियाणां मनो यथा । पुराणवेदसर्वस्वमागमेन प्रयोदितं । एकाग्रेण मया प्राप्तं च यथा ह्येष पुरातत्त्वं येन त्वत्प्रभावेन प्राप्त मद्धा
सनं मम । तत्सर्वं कथयिष्येहं त्वं मम प्रेयसी यतः । भाद्रे मासि सिते पक्षे तृतीयां हस्तसोमयुक् । तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ।
शृणु देवि त्वया पूर्वं यद्व्रतं चरितं महत् । तत्सर्वं कथयिष्यामि यथा ह्येतेन हिमालये । पार्वत्युवाच । कथं कृतं मया नाथ व्रतानामु
त्तमं व्रतं । तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर । ईश्वर उवाच । आसीत्तत्र महादिव्यो हिमवान्नगउत्तमः । नानाभूमिसमाकीर्णो
नानाद्रुमसमाकुलः । नानापक्षिसमायुक्तो नानामृगविचित्रितः । यत्र देवाः सगंधर्वाः सिद्धचारणगुह्यकाः । विचरंति यथा देवि गंधर्वाश्च
नि संकुलं । स्फाटिकैः कांचनैः शृंगैर्मणिवैदूर्यभूषितैः । भुजैर्लिखन्निवाकाशं सुहृदो मंदिरं यथा । हिमेन प्ररितो नित्यं गंगाध्वनिविनि

श्र॰कं॰ ३०

तं। पार्वति त्वं तत्र बाल्यपरमाचरती तपः। अत्र द्वादशकं देवि धूम्रपानमधोमुखी। संवत्सरं चतुःषष्टि पक्वपर्णाशनं कृतं। दृष्ट्वा ताते
न तत्कष्टं चिंतया दुःखितो भवत्। कस्मै देया मया कन्या एवं चिंतातुरोभवत्। तत्र देवान्तरतः प्राप्तो ब्रह्मपुत्रस्तु धर्मवित्। नारदो मुनि
शार्दूलः शैलपुत्रीदिदृक्षया। दत्वार्घ्यादिवरं पाद्यं नारदाय कृतांजलिः गिरिः। शैलउवाच। किमर्थमागमः स्वामिन् वद त्वं मुनिसत्त
म। महद्भाग्येन संप्राप्तं त्वदागमनमुत्तमं। नारदउ॰ शृणु शैलेन्द्र मे वाक्यं विस्मयोपेषितो सम्यगहं। योग्यं योग्याय दानं च कन्यारत्न
मिदं त्वया। वासुदेवसमो नास्ति ब्रह्मविष्णुशिवादिषु। तस्मै देया त्वया कन्या अत्र चार्थे संमतं मम। गिरिरुवाच। वासुदेवः स्वयं देवः
कन्यां प्रार्थयते यदि। तदा मया प्रदातव्या त्वदागमनगौरवात्। इत्येवं गदितं श्रुत्वा तस्य तं नारदो मुनिः। ययौ पीतांबरधरं शंख
चक्रगदाधरं। कृतांजलिपुटो भूत्वा मुनींद्रस्तमभाषत। नारदउ॰ शृणु देव त्वत्कार्यं विवाहो निश्चितस्तव। हिमवांस्तनयां गौरीं भुवा
च वचनं मुदा। दत्तास्ति तं मया तुभ्यं देवाय गरुडध्वजे। श्रुत्वा वाक्यं पितुर्देवी सखिभिः सहिता वनं। सिंहव्याघ्रमृगैर्व्याप्तं तत्र स्थितानि
र्जने। सख्युवाच। किमर्थं दुःखिता देवि कथयस्व ममाग्रतः। यतो भवत्सुभिर्हितं करिष्येहं न संशयः। पार्वत्युवाच। सखि शृणुम
म प्रीता मनोभिलषितं मम। कपर्दिनं च भर्तारं करिष्येहं न संशयः। एतन्मे चिंतितं कार्यं तातेन कृतमन्यथा। तस्मादेहं परित्यागं क रा॰म॰ ३०
रिष्येहं सखि प्रिये। पार्वत्या वचनं श्रुत्वा सखी वचनमब्रवीत्। पिता यत्र न जानाति गमिष्यामो हि तद्वनं। इत्येवं संमतं कृत्वा नी

ता सखिभिर्महद्वनं। पितापि गिरीरूप्या मा सहिमवांस्तु गृहे गृहे। क्व नु नीतासि मे पुत्रि देवदानवकिन्नरैः। नारदाय कृतं सम्यक् किं दा
स्ये गरुडध्वजे। इत्येवं चिंतयाविष्टो दिवा मूर्छितो निपपात ह। तदा हाहा कृत्वा प्रधावंतो लोकास्ते गिरिपुंगवं। जग्मुर्गिरिवरं सर्वे मूर्छि
तं गिरेर्वचः। गिरिरुवाच। दुःखस्य हेतुं शृणुत कन्यारत्नं हृतं मम। दंष्ट्रा वा कालसर्पेण सिंहव्याघ्रेण वा हता। चकंपे शोकसंतप्तो का
नने वमहारतः। गिरिर्वनाद्वनं यातः सदालोकनकारणात्। सिंहव्याघ्रैश्च भल्लूकैर्हरिभिः सहितं स्वयं। तं चापि विपिने घोरे व्रजं नी
सखिभिः सह। तत्र दृष्ट्वा नदीं रम्यां तत्तीरे च महागुहां। तां प्रविश्य सखीसार्द्धं मनोभोगविवर्जिता। सैस्था वालुका पिंडं पार्व
ती सहितं मम। यात्तनी याभाद्रपदे हस्तनक्षत्रसंयुतां। तत्र वादित्रगीतेन रात्रौ जागरणं कृतं। तेन व्रतप्रभावेन आसनं चलि
तं मम। संप्राप्तोहं तदा तत्र यत्र त्वं सखिभिः सह। प्रसन्नोस्मि मया प्रोक्तं वरं ब्रूहि वरानने। पार्वत्युवाच। यदि देव प्रसन्नोसि भ
र्ता त्वं मे हरः। तथेत्युक्त्वा तु तां देवि कैलासं पुनरागतः। ततः प्रभाते संप्राप्ते नद्यां संविसर्जितः। पारणां तु कृतं तत्र सख्या सा
र्द्धं त्वया शुभे। हिमवानपि तं देशमाजगाम वने। चतुरंगाणि रीढं स्तु विह्वलः पतितः पुनः। दृष्ट्वा तत्र नदीतीरे प्रसुप्तं कन्यकां हृष्टं। उत्था
प्य तां समारोप्य रोदनं कृतवान् गिरिः। सिंहव्याघ्रादिभल्लूकवने दुष्टे कुतः स्थिता। पार्वत्यु॰ शृणु तात मया ज्ञातं त्वं दास्यसीश्वराय
मां। तदन्यथा कृतं तातेनाहं वनमागता। ददासि तात यदि मामीश्वराय तदा गृहं। आगमिष्यामि नेवं चेदिह स्थास्यामि निश्चितं। तथे

स्तुत्वा हिमवता नीतासि त्वं गृहं प्रति। पश्चाद्दत्ता त्वमस्माकं हस्ते वैवाहिकीं क्रियां। तेन व्रतप्रभावेन सौभाग्यं साधितं त्वया। अ
धुनापि व्रतराजस्तव कस्यापि निवेदितः। नामास्य व्रतराजस्य यथा देवि यथाभवत्। आलिभिर्हरिता यस्मात्तस्माद्धरितालिका
। पार्वत्युवाच। नामेदं कथितं नाथ विधिं वद मम प्रभो। किं पुण्यं किं फलं चास्य केन च क्रियते व्रतं। ईश्वर उ०। शृणु देवि विधिं
वक्ष्ये नारीणां व्रतमीदृशं। कर्तव्यं सर्वप्रयत्नेन यदि सौभाग्यमिच्छसि। तोरणादि प्रकर्तव्यं कदलीस्तंभमंडितं। आच्छाद्य पट्ट
वस्त्रैस्तु नानावर्णविचित्रितैः। चंदनेन सुगंधेन लेपयेद्गृहमंडपं। शंखभेरीमृदंगैस्तु कारयेद्बहुनिस्वनैः। नानामंगलगीतं च कर्
त्तव्यं मम सद्मनि। स्थापयेद्वालुकालिंगं पार्वत्या सहितं मम। पूजयेद्बहुपुष्पैश्च गंधधूपादिभिर्नवैः। नानाप्रकारैर्नैवेद्यैः
पूजयेज्जागरं चरेत्। नारिकेलैः पूगफलैर्जंबीरैर्बकुलैस्तथा। बीजपूरैः सनारंगैः फलैश्चान्यैरनेकशः। ऋतुकालोद्भवैर्द्वि
विधप्रकारैः कंदमूलकैः। धूपादिगंधैश्च तथा मंत्रेणानेन पूजयेत्। नमः शिवायै शांतायै पंचवक्त्राय शूलिने। नंदिभृंगिम
हाकालगणयुक्ताय शंभवे। शिवायै हरकांतायै प्रकृत्यै सृष्टिहेतवे। शिवायै सर्वमांगल्यै शिवरूपे जगन्मये। शिवे कल्या
णदे नित्यं शिवरूपे नमोस्तु ते। शिवरूपे नमस्तुभ्यं शिवायै सततं नमः। नमस्ते ब्रह्मरूपिण्यै जगद्धात्र्यै नमो नमः। संसार
भयसंतापात्त्राहि मां सिंहवाहिनि। येन कामेन देवि त्वं पूजितासि महेश्वरि। राज्यसौभाग्यसंपत्तिं देहि मामंब पार्वति। मंत्रे राम
३१

णानेन देवि त्वां पूजयित्वा मया सह। कथां श्रुत्वा विधानेन दद्याद्द्रव्यं महेश्वरि। ब्राह्मणेभ्यो यथाशक्त्या देया वस्त्रहिरण्यगाः। अन्येभ्यो
दीयते भूरि स्त्रीणां वा भूषणादिकं। भर्त्रा सह कथां श्रुत्वा भक्तियुक्तेन चेतसा। कृत्वा व्रतेश्वरं देवि सर्वपापैः प्रमुच्यते। सप्तजन्म भ
वेद्राज्यं सौभाग्यं चैव वर्धते। तृतीयायां तु या नारी आहारं कुरुते यदि। सप्तजन्म भवेद्वंध्या वैधव्यं च पुनः पुनः। दारिद्र्यं पुत्रशो
कं च कर्कशा दुःखभागिनी। पच्यते नरके घोरे नोपवासं करोति या। राजते कांचने ताम्रे वैणवे चाथ मृन्मये। भाजने विन्यसेद
न्नं सवस्त्रफलदक्षिणं। वायनं हि द्विजवर्याय दद्यादंते च पारणं। एवं विधिं या कुरुते च नारी त्वया समाना रमते च भर्त्रा। भोगान
नेकान्भुवि भुज्यमाना सायुज्यमंते लभते हरेण। अश्वमेधसहस्राणि वाजपेयशतानि च। कथाश्रवणमात्रेण तत्फलं प्राप्यते नरैः। एतत्ते कथितं
देवि तवाग्रे व्रतमुत्तमं। कोटियज्ञकृतं पुण्यमस्यानुष्ठानमात्रतः॥ इति भविष्योत्तरपुराणे हरितालिकाव्रतं॥ अथोद्यापनं। पार्वत्युवाच। उद्यापनवि
धिं ब्रूहि त्वं त्रिपुरासुरेश्वर। भक्तितः श्रोतुमिच्छामि व्रतसंपूर्तिहेतवे। महादेव उ०। उद्यापनविधिं वक्ष्ये व्रतराजस्य शोभने। यस्यानुष्ठानमात्रेण
संपूर्णं हि व्रतं भवेत्। चतुःस्तंभं चतुर्द्वारं कदलीस्तंभमंडितं। घंटिकाचामरयुतं कमलेन सुशोभितं। चंदनागरुकर्पूरैर्लेपितं मंडपं शुभं। मध्ये
वितानं बध्नीयात्पंचवर्णैरलंकृतं। तन्मध्ये कारयेत्पद्मं पंचवर्णैः सुशोभनैः। तस्योपरि न्यसेद्व्रीहीन्द्रोणान्परिसंमितान्। सौवर्णं रज
तं ताम्रं कलशं विन्यसेद्बुधः। पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं। तस्योपरि न्यसेत्पात्रं सौवर्णं राजतं हि वा। तथा रुद्रं महादेवं रजते

व्र.र्क. ३२ नवनिर्मितं । सर्वावयवसंयुक्तां गौरीं हेमादिनिर्मितां । प्रजपेत्तत्र गंधाद्यैः पुष्पैर्नानाविधैः शुभैः । रात्रौ जागरणं कुर्यात्प्रभाते च समर्पयेत् ।
ततः प्रभाते विमले कृत्वा स्नानादिकमेव च । पूर्ववद्वार्चयेद्देवं पश्चाद्धोमं च कारयेत् । स्वगृह्योक्तेन विधिना कृत्वाग्निस्थापनं ततः । आरभे-
द्धुतहोमं नवग्रहपुरःसरं । तिलाज्यपायसं मिश्रमाज्येन च परिप्लुतान् । जुहुयाद्रुद्रमंत्रेण गौरीमंत्रेण वेदवित् । अष्टोत्तरशतं वापि अ-
ष्टाविंशतिमेव वा । एवं समाप्य होमं तु तत्राचार्यं प्रपूजयेत् । सुवर्णरत्नवासोभिर्गोभिर्दद्याद्यथाविधि । शय्यां सोपस्करां दद्याद्वायनं च
प्रयत्नतः । षोडशाद्विजयुग्मेभ्यश्च काद्यैश्च भोजयेत् । सौभाग्यद्रव्यवस्त्राणि वंशपात्राणि षोडश । दातव्यानि प्रयत्नेन तथा स्वशक्त्या य-
थाविधि । अन्येभ्योऽपि विप्रवर्येभ्यो दक्षिणां च प्रयत्नतः । श्वश्र्वै परया भक्त्या प्रदद्याद्वित्ततुष्टये । उद्दिश्य पार्वतीं चैतत्सर्वं कुर्याद्दत्तं द्विजैः ।
बंधुभिः सह भुंजीत नियतः स्वपरेऽहनि । एवं या कुरुते नारी व्रतराजं सुमध्यमे । सौभाग्यमतुलं तस्याः सप्तजन्म न संशयः । इति भविष्यपुरा-
णे व्रतोद्यापनं । इति श्रीमद्भट्टनीलकंठात्मजभट्टशंकरकृते व्रतार्के सोद्यापनं हरितालिकाव्रतं । अथ बृहस्पतिगतस्वावाचारप्राप्तेह-
स्तगौरीव्रतं । सूत उ० । कुंत्यां वनं हुपेतायां हस्तिनापुरमुत्तमे । मानितायां नरेंद्रैः स्वतनयैः पंचभिः सह । तस्याः कुशलमन्विच्छुर्व्राजमाध-
माधवः । अभिनंद्य सुखासीनं देवदेवं जनार्दनं । उवाच कुंती सानंदा त्वयं प्रागत्य मिदं वचः । कुं० यु० । धन्यास्मि कृतकृत्यास्मि सनाथास्मि राम. ३२
परंतप । साहं संभाविताद्यास्मि त्वया सर्वजगद्गुरो । यदि मे सुप्रसन्नोसि तदा वद व्रतं विभो । यद्विधाय सुखं राज्यं प्राप्नुयां तनयैः सह

त्सर्वं प्रयत्नेन व्रतं कार्यं विचक्षणैः । येन धर्मार्थकामाख्यमोक्षमाप्यपि भवेत्किल । यः करोति व्रतं विप्राः सर्वकामार्थसिद्धिदं । सर्वेप्सितं
फलं प्राप्नोति पश्चाद्गाणेशतां व्रजेत् । यदा यदा पदं विघ्नान्नरः प्राप्नोति संकटं । तदा तदा प्रकर्तव्यं व्रतं संकष्टनाशनं । त्रिपुरं हंतुकामेन
कृतं देवेन शूलिना । त्रैलोक्यजितकामेन महेंद्रेण च तत्कृतं । रावणेन कृतं पूर्वं बलिबंधनसंकटे । स्वकीयं प्राप्तवान्राज्यं गणे-
शस्य प्रसादतः । सीतान्वेषणकामेन कृतं वायुसुतेन च । संकल्प्य हृष्टवान्सोयं सीतां रामप्रियां पुरा । दमयंत्या कृतं पूर्वं नला-
न्वेषणकारणात् । सा पतिं नैषधं लेभे पुण्यश्लोकं द्विजोत्तमाः । अहल्यापि पतिं लेभे गौतमं शापवर्जितं । विद्यार्थी लभते विद्यां धना-
र्थी धनमाप्नुयात् । पुत्रार्थी पुत्रमाप्नोति रोगी रोगाद्विमुच्यते । इति व्रतार्के संकष्टचतुर्थीव्रतं । अथ पद्मावरे कार्तिकेवामुक्लचतुर्थ्यां
दूर्वागणपतिव्रतं मदनरत्ने सौरपुराणे । स्कंद उवाच । केन व्रतेन भगवान्सौभाग्यमतुलं भवेत् । पुत्रपौत्रधनैश्वर्यैर्मनुजः सुख-
मेधते । तन्मे वद महादेव व्रतानामुत्तमं व्रतं । अस्ति दूर्वागणपतेर्व्रतं त्रैलोक्यविश्रुतं । भगवत्या पुरा वीर पार्वत्या मृडया सह ॥
सरस्वत्या सहेंद्रेण विष्णुना धनदेन च । अन्यैश्च देवैर्मुनिभिर्गंधर्वैः किंनरैस्तथा । चीर्णमेतद्व्रतं सर्वैः पुरा कल्पे षडानन । तु-
र्षीपा भवे कुशानभो मासस्य पुरा यदा । तस्यां व्रतमिदं कुर्यात्कार्त्तिकां वा षडानन । कार्त्तिके सर्वधिष्ण्यो शुक्लचतुर्थ्यां
गजाननं चतुर्बाहुमेकदंतं विपाठितं । विधाय हेम्नादि द्विजेशं हेमपीठासनस्थितं । तथा हेममयीं दूर्वां तदाधारे व्यवस्थितां संस्था-

व्र. कौ. ४२ प्पवित्रं कर्तारं कलशे ताम्रभाजने। वेष्टितं रक्तवस्त्रेण सर्वतोभद्रमंडले प्रजयेद्रक्तकुसुमैः पत्रिकाभिस्तथैव भिः बिल्वपत्रमपामार्गं श
मी दूर्वांहरिप्रियां। हरिप्रियातुलसीचगंधैः सुगंधकुसुमैर्धूपालंकारैः सुगंधिः फलैश्च मोदकैः पश्चादुपहारं प्रकल्पयेत् यथा चतुष्पदरे
षतृजपेद्धिरिजासुत उमासुत नमस्तुभ्यं विश्वव्यापिन सनातन नाविघ्नौघं छिंधि सकलं सर्वपापं दहाभिते अर्घ्यमंत्रः गणेश्वरायदेवा
यकुमारगुरवे नमः लंबोदराय देवाय सर्वविघ्नापहारिणे उमांगमलसंभूतो दानवानां वधाय वै अनुग्रहाय लोकानां स देवः पातु मि
स्त्वं धूपकं धूपमंत्रः परंज्योतिः प्रकाशाय सर्वसिद्धिप्रदाय च दीपं तुभ्यं प्रदास्यामि महादेवात्मनेन नमः दीपमंत्रः गणानां त्वा गणप
तिं हवामहे कविं कवीनामुपमश्रवस्तमम् जेष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनं। उपहार मंत्रः गणेश्व
र गणाध्यक्ष गौरीपुत्र गजानन। व्रतं संपूर्णतां यातु त्वत्प्रसादादिभानन। प्रार्थना मंत्रः एवं संपूज्य विघ्नेशं यथाविभवविस्तरैः सो
पस्करं गणाध्यक्षमाचार्याय निवेदयेत् गृहाण भगवन्वस्त्रगणराजं सदक्षिणं। व्रतं तत्संपूर्णतां यातु सुव्रत दानमंत्रः
एवं यः पंचवर्षाणि कृत्वोद्यापनमारभेत् इहस्थितानं लभते कामानं देहांते शांकरं पदं अथवा शुक्लपक्षस्य चतुर्थ्यां संप्रपूज्य कु
र्याद्दूर्वाव्रतं यत्तेवं सर्वसिद्धिं समाप्नुयात् उद्यापनं विनाप्येतत्कुरुते नियमैः सुत्तमं तेन मुक्तफलैः कार्यं प्राप्तनस्नाने षडाननहेमवार
जतेनापि कृत्वा गणपतिं बुधः पंचगव्येस्तु संस्नाप्य दूर्वाभिः संप्रपूजयेत् मं वैतद्दशभिर्मंत्रैः दूर्वायुक्तैः शिरसि धृतदूर्वायुक्तैर्द राम. ४२

रामिर्मंत्रैः दूर्वायुक्तैः पंचगव्यैः स्नापनं तेन दत्तानाममंत्रा उक्ताः स्कंदपुराणे गणाधिपनमस्तेस्तु उमापुत्राघनाशन विना
यकेशपुत्रेति सर्वसिद्धिप्रदायक। एकदंतेभवक्त्रेति तथा मूषकवाहन कुमारगुरवे तुभ्यमेभिर्नामपदैः इष्टमिति इत्येवं केचि
त्तैवंतसर्वसिद्धिप्रदं शुभं व्रतं दूर्वागणपतेः किमन्यच्छ्रोतुमिच्छसीति। इति श्रीस्कंदपुराणोक्तं दूर्वागणपतिव्रतं अथ भानुवारशुक्ला
यां यस्यां कस्यां चिच्छुक्लचतुर्थ्यामारभ्य दूर्वागणपतिव्रतं स्कांदे कैलासशिखरे रम्ये सर्वदेवनिषेविते सिद्धसंघसमाकीर्णे
षर्वगणसेविते देव्यासह महादेवे दीव्यत्रक्षैर्विनोदितः जितासि त्वं मितेत्याह पार्वती परमेश्वरः सापि त्वं जितइत्याह सविवाद इत्यो
रभूत् चित्रनेमिस्तत्रादेष्टो मृषावादमभाषत तदा क्रोधसमाविष्टो गौरीशापं ददौ ततः प्रसादिता तेन दिशापं च जगाद सा यदा
सरोवरे रम्ये चरिष्यति भवान्भुवि तदा स्वर्गीरिणकाः सर्वा इहसंति त्वां समागताः तदा भवविशापस्त्वमिति शुक्तः सपर्यानहाततः कृ
तिपयाहोभिः स्नानेन सरोवरे स्नात्वा वसं नस्तास्त्रवं तं सेहुर्वांविघ्नेश्वरव्रतं। किंमेतेनस्माभिरिह वपरकाभीष्टसिद्धये।
ततोऽब्रवीन्महाराजा व्रतमेतदनुमईष येनाहं गिरिजाशापान्मुच्येयं चिरदुःखितः ततस्ताभ्यः मुवक्तं व्रतमेतदनुत्तमं। दूर्वाविघ्नेश्व
रापवत्र पलते सर्वसिद्धिदं शुक्लपक्षे चतुर्थ्यां भानुवारेण संयुतां तस्यां नियोत्समारभ्य मासा सान्वतमाचरेत्। प्रत्यहं मस्नम
स्काराः षट्दूर्वाः पदूपदेहिणाम् शुक्लपक्षे चतुर्थ्यां च प्रत्येकं चैकविंशतिः एकभक्तं च कर्तव्यं मृगपादिमोख्या वेदिनायकं देवं

वृ॰के॰ ४३

समाहितमनाः। अरुणं तरुणारुणसंकाशं सर्वाभरणभूषितं जटाकलापसुभगं कुंकुमेनोपरंजितं। गजाननं प्रसंनास्यं सिंदूरतिलकां
कितं विशालवक्षसं भावं मुक्तामणिविभूषितं चतुर्भुजमुदारांगं किंकिणीकंकणोर्युतं पाशांकुशधरं देवं दंतमोदकधारिणं। महो
दरं महानागं वृद्धकुक्षिं मुदान्वितं सुंदरं मुक्तसंवीतमभिभास्यमपराजितं। प्रणतामरसंदोहमौलिमालोरुकांतिभिः विराजितांघ्रिक
मलं द्विजः एवं चरित्वा पारणमासात्सुधीः सत्यपरायणः पश्चात्कृष्णादिहवीभिर्वर्षयेत्संसदातु नः उद्यापनं वकुर्यात्तु देशकालानुसार
तः ततो मगधदेशस्य मानेन यवपिष्टकं दशमानकमादाय दशगास्वापिमोदकान् कृत्वा घृते न तत्समस्तं कपर्द्देवाय यजमानेन
द्विजाय प्रदातव्यं स्त्रोत्रियाय कुटुंबिने विनायको गणाध्यक्षो विघ्नेशश्श्रीगणाधिपः वरदस्तु मुरवश्चैव ह्रस्वाय दैः प्रपूजयेत् प
ट्टदर्भस्मगणयाद्दत्वात् महारजोपकल्पयेत्। एवं कुरु महेशान श्रीगणाधिपः वरदस्तु मुरवश्चैव हूवाय दैः प्रपूजयेत् पदृदर्भ
स्वेनपादद्यात् महारजोपकल्पयेत्। एवं कुरु महेशान श्री सर्वमभिवांछितं तथैवस्कंदादिनेभिः श्रीराविल्वादिविनायकं शाप्यानु
तः ततः शंभुमप्यगात्स्नाहसन्निव शंकरेण ततः स्पष्टः चित्रनेमिस्तथाज्ञगौ। व्रतं कृत्वा ततः शंभुर्गणेशस्य तु सत्फलान्। गौरीको
यप्रसादाय शिवो पिसदूतां तथा सापि देवी शिवेनोक्तं चक्रे व्रतमनुत्तमं कार्तिकेयो पि मात्रोक्तस्त सरस्वदर्शने कृपा। व्रतं चकार सं
दाच कार्त्तिकेयो क्रमादरात् सो पि राज्यप्रसादाय पुत्रार्थं च चकार ह ततः क्रमेण लोके स्मिन् चतुर्थीतस्मुत्तमं व्रतं दूर्वागणेशस्य राम॰ ४३

सर्वसिद्धिकरं परं। शोकव्याधिभयोद्वेगवंधव्यसनवर्जितः विमुक्तः पुत्रपौत्रादिधनधान्यसमावृतः इहलोके सुखी भुत्वा यस्याद्विव पु
रं व्रजेत् व्रतेनानेन दूर्वारूपविघ्नेशस्य प्रसादतः पः पठेत्तु रपाम स्नापकथामेतां दिने दिने। प्रणम्य हापिसततं सर्वसिद्धिमवाप्नु
यात् इति स्कंदपुराणोक्त दूर्वागणपतिव्रतं तत्र समाप्तं। अथ भाद्रमुक्तचतुर्थ्यां सिद्धिविनायकव्रतं हेमाद्रौ स्कांदे तत्र मध्याह्नव्या
पिन्यां कार्या प्रातः शुक्लातिलैः स्नानं मध्याह्ने पूजयेन्नृप इति गणपतिकल्पमंत्रे व पूजाविधानात् दिनद्वयेतद्व्याप्तौ व्याप्तौ वा दे
कदेशव्याप्तौ पूर्वा न्यायपरा चतुर्थी गणनायस्य मातृद्वितीया प्रशस्यते मध्याह्नव्यापिनी सा तु परतश्चेत्परेहनीति वृहस्प
